रसैश्च सर्वैः परितोऽभिजुष्टां हरिद्रया पुष्पफलैरनेकैः। अजाजिकुस्तुम्बुरुशर्कराभिः वितानकं चोपरि पञ्चवर्णम्। स्नातस्ततो मङ्गलवेदघोषैः प्रदक्षिणीकृत्य सपुष्पहस्तः। आवाहयेत् ताङ्गुड़धेनुमन्त्रैः द्विजाय दद्यादथ दर्भपाणिः” हेमा० दा०मत्स्यपु०। [हेमच०।

**हिरण्यकोष** पु० हिरण्यस्य कोष इव। कृताकृतस्वर्णरौप्ये

**हिरण्यगर्भ** पु० हिरण्यं स्वर्णमयाण्डं गर्भ उत्पत्तिस्थानमस्य। १चतुर्मुखे ब्रह्मणि तस्य हैमाण्डप्रभवत्वात्तथात्वम् “तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः” मनूक्तेः। तुलादिषोड़शमहादानमध्ये दानार्थं स्वर्णादिना कल्पिते २हिरण्यगर्भाख्ये पात्रे ३उपचारात्तद्दाने ४शालग्राममूर्त्तिभेदे च शालग्रामशब्दे दृश्यम्। तस्य दानविधिश्च हेमा०दा०मत्स्यपु० “अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। हेम्ना हिरण्यगर्भाख्यं महापातकनाशनम्। पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्। कुर्य्यादुपोषितस्तद्वल्लोकेशावाहनं बुधः। पुण्याहवाचनं कृत्वा तद्वत् कृत्वाधिवासनम्”। अत्र देशकालवृद्धिश्राद्धशिवादिपूजाब्राह्मणवाचनगुरुऋत्विग्वरणमधुपर्कदानकुण्डमण्डपवेदिसम्भारहोमाधिवासनादि सर्वं हिरण्यगर्भादिपञ्चदशमहादानप्रकृतिभूतं मत्स्यपुराणोक्ततुलापुरुषदानविहितं वेदितव्यम्। “ब्राह्मणैरानयेत् कुण्डं तपनीयमयं शुभम्। द्वासप्तत्यङ्गुलोच्छ्रायं हेमपङ्कजगर्भवत्। त्रिभागहीनविस्तारं प्रशस्तं मुरजाकृति”। कुण्डमिति, हिरण्यगर्भाख्यं पात्रं, तपनीयमयं, स्वर्णमयं हेमपङ्कजम् तदेव नाभिशब्दवाच्यं, त्रिभागहीनविस्तारमिति, अष्टाचत्वारिंशदङ्गुलविस्तारमित्यर्थः। मुरजाकृति, मृदङ्गाकृति। आज्यक्षीरातिपूरितमिति कश्चित्पाठः। तत्र घृतक्षीरे तुल्यपरिमाणे, यद्यपि चातिपूरितमित्युच्यते तथापि यजमानप्रवेशेन यथा तन्न वहिरुच्छलति तथा पूरणीयम्। “दशाङ्गानि सरत्नानि दात्रं सूचीं तथैव च। हेमनालं सपिटकं बहिरादित्यसंयुतम्। तथैवावरणं नाभेरुपवीतञ्च काञ्चनम्। पार्श्वतः स्थापयेत् तद्वद्धेमदण्डं कमण्डलुम्”। दशाङ्गानि, दशखण्डानि, अस्त्राणीति कश्चित्पाठः। तानि काञ्चनानि अस्त्राकारतया, अस्त्राणीति। अस्त्रखनित्रमिति केचित्, रत्नानि पञ्च प्रसिद्धानि, सपिटकं, सङ्कुचान्वितं वहिरिति। हेमकुण्डाद् बाह्यप्रदेशे पार्श्वतः स्थापयेदित्यनेन सम्बन्धः। वह्निभास्करसंयुतमिति च पाठान्तरम् “वह्निभास्करयोर्लक्षणं ब्रह्माण्डदाने वक्ष्यते। वह्निमाप्यपसंयुतमिति, वा पाठ तदा आप्यपः वरुणः”। तल्लक्षणमपि तत्रैव, नाभेरावरणमिति, नाभ्यावरणार्थं सौवर्णं वस्त्रं दात्रादीन्यपि सुवर्णमयान्येव कार्य्याणि। “पद्माकारं विधानं स्यात् समन्तादङ्गुलाधिकम्। मुक्तावलीसमोपेतं पद्मरागदलान्वितम्। तिलद्रोणोपरिगतं वेदीमध्ये ततोऽर्चयेत्”। द्रोणः परिभाषायां व्याख्यातः। इह खलु हिरण्यगर्भनिर्माणसुवर्णपरिमाणस्यानाम्नानात् यावता यजमानस्य प्रवेशावारणोपायिकं कुण्डं भवति तावता घटनीयं, तच्च वेदिकामध्ये लिखितचक्रस्योपरि तिलद्रोणं निधाय तदुपरि संस्थाप्य पूजयेत्। अथ तुलापुरुषदानतदधिवासनदिनादन्येद्युर्ब्राह्मणवाचनं विधाय पूर्णाहुतिप्रभृतिकर्मशेषसमाप्तिं कुर्य्यात्। ततश्च कुण्डसमीपवर्त्तिकलशजलैः पूर्ववदभिषेकः, तदुच्यते। “ततो मङ्गलशब्देन ब्रह्मवाचरवेण च। सर्वौषध्युदकस्नानं स्नापितो वेदपुङ्गवैः”। सर्वौषध्यः, व्याख्याताः, “शुक्लमाल्याम्बरधरः सर्वाभरणभूषितः। इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः। नमो हिरण्यगर्भाय हिरण्यकवचाय च। सप्तलोकसुराध्यक्ष! जगद्धात्रे नमो नमः। भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः। ब्रह्मादयस्तथा देवा नमस्ते विश्वधारिणे। नमस्ते भुवनाधार! नमस्ते भुवनाश्रय!। नमो हिरण्यगर्भाय गर्भे यस्य पितामहः। यतस्त्वमेव भूतात्मा भूते भूते व्यवस्थितः। तस्मात् मामुद्धराशेषदुःखसंसारसागरात्। एवमामन्त्र्य तन्मध्यमाविश्यास्त उदङ्मुखः। मुष्टिभ्यां परिसंगृह्य धर्मराजचतुर्मुखौ। जानुमध्ये शिरः कृत्वा तिष्ठदुच्छ्वासपञ्चकम्”। धर्मराजोऽत्र सुवर्णमयः, तल्लक्षणञ्च तुलापुरुषेऽभिहितं चतुर्मुखोऽपि सौवर्णः, तल्लक्षणं ब्रह्माण्डदाने वक्ष्यते। तत्र दक्षिणमुष्टौ धर्मराजः, वाममुष्टौ चतुर्मुख इति। “गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा। कुर्य्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः”। अनवलोकनमप्यत्र विज्ञेयं, एतेषु, गर्भादानादिषु वक्ष्यमाणेषु जातकर्मादिषु, मन्त्रयुक्तमनुध्यानमात्रमाचरणीयम् “गीतमङ्गलघोषेण गुरुं सन्तोषयेत् ततः। जातकर्मादिकाः कुर्य्यात् क्रियाः षोड़श चापराः”। तास्ताभिधीयन्ते। जातकर्म१ नामकरणं२ निष्क्रमणं३ अन्नप्राशनं४ चूड़ाकर्म५ उपनयनं६ प्राजापत्यम्७ ऐन्द्रं